International Journal of Sanskrit Research 2018; 4(4): 166-167

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(4): 166-167
© 2018 IJSR
www.anantaajournal.com
Received: 20-05-2018
Accepted: 25-06-2018

**डक्टर अरुणकुमारपोड़ेलः**
श्यामसुन्दरकालेजः (संस्कृतविभागः),
पूर्व वर्धमान, पश्चिमवङ्गः, भारत

**Correspondence**
**डक्टर अरुणकुमारपोड़ेलः**
श्यामसुन्दरकालेजः (संस्कृतविभागः),
पूर्व वर्धमान, पश्चिमवङ्गः, भारत

# संस्कृत साहित्ये जातीयतावादः

**डक्टर अरुणकुमारपोड़ेलः**

**सारांश**
संस्कृतसाहित्ये जातीयतावादभावनेति विषयस्य उत्सांन्बेषणाय चलामस्तावद् ऋग्वेदीये संस्कृत साहित्ये। प्राचीनकाले भारतभूमौ नवागता अस्माकं पूर्वपुरुषा आर्यजना भारतभूखण्डे स्वकीय निवासभूमेः असुराभिधेयेऽनार्येभ्यो रक्षार्थं यदा सततयुयुधाना आसन्, तदा तेषां तस्मिन् युद्धे कल्पिताखिलदेवतामण्डले एकान्तसहायरूपेण परमवलशालिनी समाविरासीद् इन्द्राख्या काचिद् देवतैव। भिण्टारनित्सप्रभृत्यर्वाचीनप्रतीच्यपण्डितानां मतेन अत्रैव स्वनिवासभूमिखण्डरक्षार्थं जातीय सचेतनताया प्रथम सूत्रपातः। यजुर्वेदसंहितायां राष्ट्रचिन्ता अथर्ववेद संहितायाः भूमिसूक्तम् स्थालीपुलाकन्यायेन सुदूरवैदिकयुगे अपि स्वीय भूमिचेतना प्रसूताधुनिक जातीयतावादस्य वीजमावहति। एवं प्राचीनभारते वैदिकयुगे स्वनिवासभूमिखण्डं प्रति प्रीतिरेव प्राचीनजातीयतावादविमर्शनस्य अग्रदूतीभवतीति स्थितम्। डक्टर दिलीपकाञ्जिलाल कृतात् – "Literature on Patriotism and Patriotic Feeling in Sanskrit" ग्रन्थात् उल्लेखो यथा -"The use of the word जन्मभूमि can be traced to as old a period as First century B.C. Love for Motherland, nay of India, comes in as a refrain in Sanskrit Literature from hoary past."

## प्रस्तावना

वैदिक युगस्यान्तिमे भागे औपनिषदयुगे पारमार्थिकदार्शनिकचिन्तास्वपि क्वचिद् – क्वचिद् विद्युदिव विद्योतते साम्प्रतिकजातीयतावादवोधच्छाया। छान्दोग्यपनिषदि (७/२५/२) 'स्वराज' – शब्द एवात्र प्रमाणम्। स्वामी विवेकानन्दचिन्तायां शव्दे अयं Freedom इत्यर्वाचीनां धारणामेव द्योतयति। वैदिकशासनमोचनपूर्वकं स्वाराज्यलाभाय ऊनविंशशताव्दयां भारतीयानाम् एकजातीयता वोधसमुत्थं यत् स्वतन्त्रतायुद्धं (Freedom Fight) तत्र स्वराज इति औपनिषदः शव्दः खलु महतीं तात्पर्यमयीयं भूमिकापलयत्।

अथानुसन्धेयम्, आधुनिकजातीयतावोधः वैदिकालमतीत्य भारतीयभूमौ मुकुलित तरतामापेदे वैदिकोत्तरेतिशास पुराणादिप्राचीनसंस्कृतसाहित्येष्वप्रीति। रामायणग्रन्थे यथा युद्धकाण्डे लङ्कायुद्धजयान्तरं जानकीलक्ष्मणाभ्यां साहितस्य स्वदेशभूमौ प्रत्यावर्त्तनावसरे श्रीरामचन्द्रस्य मुखे सुप्रसिद्धं चिरामरवचणम् : -

**"इयं स्वर्णपुरी लङ्का सखे मह्यं न रोचते।**
**जननी जन्मभूमिस्च स्वर्गादपि गरीयसी॥"**

महत् भारतम् महाभारतम् (Great India) इति ग्रन्थस्य नामैव सूचयति सुप्राचीनकालतो भारतवर्षे प्रचलदखण्डभारतभूखण्डभावनाम्। महाभारतस्य आदिपर्वणि – भीष्मपर्वणि – भूमिपर्वणि च भूरिशो विकीर्णानि सन्त्युपादानानि यानि निश्चप्रचमेव प्रमाणयन्ति आसिन्महती नूनं महाभारतीययेयं भारतीयभूखण्डाखण्डयैकखण्डताभावनेति, या नाम भावना प्राचीनकाले भारतीयाखण्डजातीयता वोधस्य सूचकरूपेण कल्पते।

अखण्डं भारतभूखण्डमिमऽधिकृत्य पश्चादखिलभारतीयजातीयतासचेतनतायाः पौराणिकाग्रणीभूमिकाया दिङंमात्रमुदाहरणं यता विष्णुपाराणे –

**"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैवदक्षीणम्।**
**वर्षं तद् भारतं नाम भारती यत्र सन्ततिः॥"**

एवं व्रह्मपुराणादितरपुराणा दिषु समग्रपौराणिकसंस्कृतसाहित्ये जातीयभावनेति अद्यतनालोच्यविषयस्य विमर्शनं विधेयम्।

अथ सूचयामस्तावत् पूर्वकालिदासीयं कालिदासीयम् कालिदासोत्तरीयमिति च लौकिकं संस्कृतवाङ्मयम् जातीयताया ज्ञापकं यथा, कविभासस्य प्रतिज्ञायौगन्धरायणनाटके महामन्त्रिणो यौगन्धरायणस्य स्वदेशप्रीतिः, कविकालिदासस्य रघुवंसकाव्ये रघोर्दिग्विजयः, मेघदूतकाव्ये मेघदूतस्य भारतस्य एकप्रान्ततोऽपरप्रान्तपर्यन्तं यात्रावर्णणम्, कविशूद्रकस्य मृच्छकटिकेननाटके (द्वितियांके) जन्मभूमिशव्दस्य प्रयोगः, कविश्रीहर्षस्य नैषधचरितकाव्ये स्वयंवरसभायां भारतवर्षस्य नानाप्रान्तेभ्यो नृपतीनां समागमस्तत्र संस्कृतभाषायामन्येन्यं विस्त्रम्भलापः, कविवाणभट्टस्य कादम्वरीगद्यकाव्ये मदलेखाया उक्तिः कीदृश् भारतवर्षं कृदृशी उज्जयिणी इति। लौकिकसंस्कृतवाङ्मयवारिधिमथितमिदं नवनीतविन्दुर्दशयति सिन्धुं प्राचिनभारते कीदृर्शमासीद् विशालम् भौगोलिकैकचिन्तनम् ☎Contemplation of Geographical Unity in ancient India☽। प्राचीनभारतीयलौकिकसंस्कृतसाहित्यस्य समान्तरालधारया प्रवहति खल्वपरधाराद्वयम् अनुरूपभारतवषैक्यभावनां दधानम्। एकं यथा संस्कृतभाषया रक्षिता शिलालिपिमाला, अपरं च स्मृतिशास्त्रादिसाहित्यम्। क्षितितलशयनीये येन नीता त्रियामा इति भिटारी-प्रस्तरलिप्यां स्कन्दगुप्तस्य वर्णनं ज्ञापयति तस्य राज्ञः स्वदेशप्रीतिमेवयद् हि अद्यतनप्रतीच्यभाषायाम् Patriotism इति कथ्यते –

> "एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
> स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥"

इति स्मृतिशास्त्रियं दिग्दर्शकमेकमुदाहरणम्। कौटिल्यार्थशास्त्रे भारतवर्षस्य नैकप्रदेशेषु उत्पन्नवस्तुनां प्रसिद्धतस्य समुल्लेखात् भारतवर्षस्य प्रादेशिकजातियानुभूतिः (regional national feeling) प्रकटिता इति पण्डिता मन्यन्ते। अन्तसमाक्षरकवितायाः, यथा –

> "जय जय भारतजननी
> महिममयि मङ्गलरुपे कनकरत्नमालिनी
> विन्ध्यशैलस्तव मेखला
> त्वं हि श्यामपर्णकुन्तला
> वनप्रान्तरनीलाञ्चला हिमगिरिकिरिटिनी।"
> वङ्गभाषावद्धदेशात्मवोधकसंगीतानाम्
> अस्मत्कृतसंस्कृतानुवादनिदर्शनद्वयं,

यथा – रवीन्द्रसंगीतस्य संस्कृतानुवाद : -

> "अयि मे देशभूमे त्वयिलगये मस्तकम्।
> त्वयि हि विश्वमयी, अञ्चलं विश्वमाता पातयसि॥"

कतिपयानि तेषां समुल्लेखानि, यथा – "सत्यमेव जयते" – इति भारतराष्ट्रीया आदर्शवाणी, "वन्दे मातरम्" – इति भारतीयं जातीयसंगीतम्, "वहुजनसुखाय वहुजनहिताय" – इति भारतीया आकाशवाणी। स्वतन्त्रभारतवाराष्ट्रस्य जागृतये परिगृहीता वैदिको मर्मवाणी – "राष्ट्र जागृयाम्" इति दिक्।

आलोच्या ग्रन्थपञ्जी


1. भिनतारनिज : हिसट्रि अव् इण्डियान लिटारेचार।
2. ड: दिलीप काञ्जिलाल: लिटारेचार अन पोट्रियटिजम्....।
3. ड: सत्यरञ्जन व्याणार्जी: संस्कृतसाहित्य समालोचना संग्रह। च संस्कृत ओ भारतीय भाषा ।
4. ड: विश्वकवि रवीन्द्रनाथठाकुरः गीतवितान।
5. ड: ध्यानेशनारायण चक्रवर्ती: जनशिक्षाय संस्कृत।